# શ્રીકુમારસ્તુતિઃ

Shri Kumarastuti

sanskritdocuments.org

May 12, 2018

# Shri Kumarastuti

# શ્રીકુમારસ્તુતિઃ

## Sanskrit Document Information

Text title : kumArastutiH

File name : kumArastutiH.itx

Category : subrahmanya

Location : doc_subrahmanya

Proofread by : NA

Description/comments : shivapurANam 2.4.6 verses 4-22

Source : shivapurANam, saMhitA 2 (rudrasaMhitA), khaNDaH 4 (kumArakhaNDaH) adhyAyaH 06

Latest update : May 12, 2018

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

May 12, 2018

*sanskritdocuments.org*

# શ્રીકુમારસ્તુતિઃ

વિપ્ર ઉવાચ -
શૃણુ સ્વામિન્વચો મેઘ કષ્ટં મે વિનિવારય ।
સર્વબ્રહ્માણ્ડનાથસ્ત્વમતસ્તે શરણં ગતઃ ॥ ૧॥

અજમેધાધ્વરં કર્તુમારમ્ભં કૃતવાનહમ્ ।
સોઽજો ગતો ગૃહાન્મે હિ ત્રોટયિત્વા સ્વબન્ધનમ્ ॥ ૨॥

ન જાને સ ગતઃ કુત્રાઽન્વેષણં તત્કૃતં બહુ ।
ન પ્રાપ્તોઽતસ્સ બલવાન્ ભઙ્ગો ભવતિ મે ક્રતોઃ ॥ ૩॥

ત્વયિ નાથે સતિ વિભો યજ્ઞભઙ્ગઃ કથં ભવેત્ ।
વિચાર્યૈવાઽખિલેશાન કામ પૂર્ણં કુરુષ્વ મે ॥ ૪॥

ત્વાં વિહાય શરણ્યં કં યાયાં શિવસુત પ્રભો ।
સર્વબ્રહ્માણ્ડનાથં હિ સર્વામરસુસેવિતમ્ ॥ ૫॥

દીનબન્ધુર્દયાસિન્ધુસ્સુસેવ્યા ભક્તવત્સલઃ ।
હરિબ્રહ્માદિદેવૈશ્ચ સુસ્તુતઃ પરમેશ્વરઃ ॥ ૬॥

પાર્વતીનન્દનસ્સ્કન્દઃ પરમેકઃ પરન્તપઃ ।
પરમાત્માઽત્મદસ્સ્વામી સતાં ચ શરણાર્થિનામ્ ॥ ૭॥

દીનાનાથ મહેશ શઙ્કરસુત ત્રૈલોક્યનાથ પ્રભો
  માયાધીશ સમાગતોઽસ્મિ શરણં માં પાહિ વિપ્રપ્રિય ।
ત્વં સર્વપ્રભુપ્રિયઃ ખિલવિદબ્રહ્માદિદેવૈસ્તુત-
  સ્ત્વં માયાકૃતિરાત્મભક્તસુખદો રક્ષાપરો માયિકઃ ॥ ૮॥

ભક્તપ્રાણગુણાકરસ્ત્રિગુણતો ભિન્નોઽસિ શમ્ભુપ્રિયઃ
  શમ્ભુઃ શમ્ભુસુતઃ પ્રસન્નસુખદસ્સચ્ચિત્સ્વરૂપો મહાન્ ।
સર્વજ્ઞસ્ત્રિપુરઘ્નશઙ્કરસુતઃ સત્પ્રેમવશ્યસ્સદા
  ષણ્મુખઃ પ્રિયસાધુરાનતપ્રિયસ્સર્વેશ્વરશ્શઙ્કરઃ ।

સાધુદ્રોહકરઘ્ન શઙ્કરગુરો બ્રહ્માણ્ડનાથો પ્રભુઃ
    સર્વેષામમરાદિસેવિતપદો માં પાહિ સેવાપ્રિય ॥ ૯॥

વૈરિભયઙ્કર શઙ્કર જનશરણસ્ય વન્દે તવ પદપદ્મં સુખકરણસ્ય ।
વિજ્ઞપ્તિં મમ કર્ણે સ્કન્દ નિધેહિ નિજભક્તિં જનચેતસિ સદા વિધેહિ ॥ ૧૦॥

કરોતિ કિં તસ્ય બલી વિપક્ષોદક્ષોઽપિ પક્ષોભયાપાર્શ્વગુપ્તઃ ।
કિન્તક્ષકોપ્યામિષભક્ષકો વા ત્વં રક્ષકો યસ્ય સદક્ષમાનઃ ॥ ૧૧॥

વિબુધગુરુરપિ ત્વાં સ્તોતુમીશો ન હિ સ્યાત્-
    કથય કથમહં સ્યાં મન્દબુદ્ધિર્વરાર્ચ્યઃ ।
શુચિરશુચિરનાર્યો યાદૃશસ્તાદૃશો વા
    પદકમલ પરાગં સ્કન્દ તે પ્રાર્થયામિ ॥ ૧૨॥

હે સર્વેશ્વર ભક્તવત્સલ કૃપાસિન્ધો ત્વદીયોઽસ્મ્યહં
    ભૃત્યસ્સ્વસ્ય ન સેવકસ્ય ગણપસ્યાઽઽગશ્શતં સત્પ્રભો ।
ભક્તિં ક્વાપિ કૃતાં મનાગપિ વિભો જાનાસિ ભૃત્યાર્તિહા
    ત્વત્તો નાસ્ત્યપરોઽવિતા ન ભગવન્ મત્તો નરઃ પામરઃ ॥ ૧૩॥

કલ્યાણકર્તા કલિકલ્મષઘ્નઃ કુબેરબન્ધુઃ કરુણાર્દ્રચિત્તઃ ।
ત્રિષટ્કનેત્રો રસવક્ત્રશોભી યજ્ઞં પ્રપૂર્ણં કુરુ મે ગુહ ત્વમ્ ॥ ૧૪॥

રક્ષકસ્ત્વં ત્રિલોકસ્ય શરણાગતવત્સલઃ ।
યજ્ઞકર્તા યજ્ઞભર્તા હરસે વિઘ્નકારિણામ્ ॥ ૧૫॥

વિઘ્નવારણ સાધૂનાં સર્ગકારણ સર્વતઃ ।
પૂર્ણં કુરુ મમેશાન સુતયજ્ઞ નમોઽસ્તુ તે ॥ ૧૬॥

સર્વત્રાતા સ્કન્દ હિ ત્વં સર્વજ્ઞાતા ત્વમેવ હિ ।
સર્વેશ્વરસ્ત્વમીશાનો નિવેશસકલાઽવનઃ ॥ ૧૭॥

સંગીતજ્ઞસ્ત્વમેવાસિ વેદવિજ્ઞઃ પરઃ પ્રભુઃ ।
સર્વસ્થાતા વિધાતા ત્વં દેવદેવસ્સતાં ગતિઃ ॥ ૧૮॥

ભવાનીનન્દનશ્શમ્ભુતનયો વયુનઃ સ્વરાટ્ ।
ધ્યાતા ધ્યેયઃ પિતૃણાં હિ પિતા યોનિઃ સદાત્મનામ્ ॥ ૧૯॥

ઇતિ શ્રીશિવમહાપુરાણે દ્વિતીયાયાં રુદ્રસંહિતાયાં ચતુર્થે કુમારખણ્ડે
કુમારાઽદ્ભુતચરિતવર્ણનં નામ ષષ્ઠોઽધ્યાયાન્તર્ગતં

શ્રીકુમારસ્તુતિઃ સમ્પૂર્ણા ॥

shivapurANam, saMhitA 2 (rudrasaMhitA), khaNDaH 4 (kumArakhaNDaH) adhyAyaH 6

Verses 4-22

NA

*Shri Kumarastuti*

pdf was typeset on May 12, 2018

Please send corrections to *sanskrit@cheerful.com*